# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ४२

धूम्राक्षं प्रेक्ष्य निर्यान्तं राक्षसं भीमनिस्वनम् ।
विनेदुर्वानराः सर्वे प्रहृष्टा युद्धकाङ्क्षिणः ॥ १॥

तेषां तु तुमुलं युद्धं सञ्जज्ञे हरिरक्षसाम् ।
अन्योन्यं पादपैर्घोरैर्निघ्नतं शूलमुद्गरैः ॥ २॥

राक्षसैर्वानरा घोरा विनिकृत्ताः समन्ततः ।
वानरै राक्षसाश्चापि द्रुमैर्भूमौ समीकृताः ॥ ३॥

राक्षसाश्चापि सङ्क्रुद्धा वानरान्निशितैः शरैः ।
विव्यधुर्घोरसङ्काशैः कङ्कपत्रैरजिह्मगैः ॥ ४॥

ते गदाभिश्च भीमाभिः पट्टसैः कूटमुद्गरैः ।
घोरैश्च परिघैश्चित्रैस्त्रिशूलैश्चापि संशितैः ॥ ५॥

विदार्यमाणा रक्षोभिर्वानरास्ते महाबलाः ।
अमर्षाज्जनितोद्धर्षाश्चक्रुः कर्माण्यभीतवत् ॥ ६॥

शरनिर्भिन्नगात्रास्ते शूलनिर्भिन्नदेहिनः ।
जगृहुस्ते द्रुमांस्तत्र शिलाश्च हरियूथपाः ॥ ७॥

ते भीमवेगा हरयो नर्दमानास्ततस्ततः ।
ममन्थू राक्षसान्भीमान्नामानि च बभाषिरे ॥ ८॥

तद्बभूवाद्भुतं घोरं युद्धं वानररक्षसाम् ।
शिलाभिर्विविधाभिश्च बहुशाखैश्च पादपैः ॥ ९॥

राक्षसा मथिताः के चिद्वानरैर्जितकाशिभिः ।
ववर्षू रुधिरं के चिन्मुखै रुधिरभोजनाः ॥ १०॥

पार्श्वेषु दारिताः के चित्के चिद्राशीकृता द्रुमैः ।
शिलाभिश्चूर्णिताः के चित्के चिद्दन्तैर्विदारिताः ॥ ११॥

ध्वजैर्विमथितैर्भग्नैः खरैश्च विनिपातितैः ।
रथैर्विध्वंसितैश्चापि पतितै रजनीचरैः ॥ १२॥

वानरैर्भीमविक्रान्तैराप्लुत्याप्लुत्य वेगितैः ।
राक्षसाः करजैस्तीक्ष्णैर्मुखेषु विनिकर्तिताः ॥ १३॥

विवर्णवदना भूयो विप्रकीर्णशिरोरुहाः ।
मूढाः शोणितगन्धेन निपेतुर्धरणीतले ॥ १४॥

नये तु परमक्रुद्धा राक्षसा भीमविक्रमाः ।
तलैरेवाभिधावन्ति वज्रस्पर्शसमैर्हरीन् ॥ १५॥

वनरैरापतन्तस्ते वेगिता वेगवत्तरैः ।
मुष्टिभिश्चरणैर्दन्तैः पादपैश्चापपोथिताः ॥ १६॥

सन्यं तु विद्रुतं दृष्ट्वा धूम्राक्षो राक्षसर्षभः ।
क्रोधेन कदनं चक्रे वानराणां युयुत्सताम् ॥ १७॥

प्रासैः प्रमथिताः के चिद्वानराः शोणितस्रवाः ।
मुद्गरैराहताः के चित्पतिता धरणीतले ॥ १८॥

परिघैर्मथिताः के चिद्भिण्डिपालैर्विदारिताः ।
पट्टसैराहताः के चिद्विह्वलन्तो गतासवः ॥ १९॥

के चिद्विनिहता भूमौ रुधिरार्द्रा वनौकसः ।
के चिद्विद्राविता नष्टाः सङ्क्रुद्धै राक्षसैर्युधि ॥ २०॥

विभिन्नहृदयाः के चिदेकपार्श्वेन शायिताः ।
विदारितास्त्रशूलै च के चिदान्त्रैर्विनिस्रुताः ॥ २१॥

तत्सुभीमं महद्युद्धं हरिराकस सङ्कुलम् ।
प्रबभौ शस्त्रबहुलं शिलापादपसङ्कुलम् ॥ २२॥

धनुर्ज्यातन्त्रिमधुरं हिक्कातालसमन्वितम् ।
मन्द्रस्तनितसङ्गीतं युद्धगान्धर्वमाबभौ ॥ २३॥

धूम्राक्षस्तु धनुष्पाणिर्वानरान्रणमूर्धनि ।
हसन्विद्रावयामास दिशस्ताञ्शरवृष्टिभिः ॥ २४॥

धूम्राक्षेणार्दितं सैन्यं व्यथितं दृश्य मारुतिः ।
अभ्यवर्तत सङ्क्रुद्धः प्रगृह्य विपुलां शिलाम् ॥ २५॥

क्रोधाद्द्विगुणताम्राक्षः पितृतुल्यपराक्रमः ।

शिलां तां पातयामास धूम्राक्षस्य रथं प्रति ॥ २६॥

आपतन्तीं शिलां दृष्ट्वा गदामुद्यम्य सम्भ्रमात् ।
रथादाप्लुत्य वेगेन वसुधायां व्यतिष्ठत ॥ २७॥

सा प्रमथ्य रथं तस्य निपपात शिलाभुवि ।
सचक्रकूबरं साश्वं सध्वजं सशरासनम् ॥ २८॥

स भङ्क्त्वा तु रथं तस्य हनूमान्मारुतात्मजः ।
रक्षसां कदनं चक्रे सस्कन्धविटपैर्द्रुमैः ॥ २९॥

विभिन्नशिरसो भूत्वा राक्षसाः शोणितोक्षिताः ।
द्रुमैः प्रमथिताश्चान्ये निपेतुर्धरणीतले ॥ ३०॥

विद्राव्य राक्षसं सैन्यं हनूमान्मारुतात्मजः ।
गिरेः शिखरमादाय धूम्राक्षमभिदुद्रुवे ॥ ३१॥

तमापतन्तं धूम्राक्षो गदामुद्यम्य वीर्यवान् ।
विनर्दमानः सहसा हनूमन्तमभिद्रवत् ॥ ३२॥

ततः क्रुद्धस्तु वेगेन गदां तां बहुकण्टकाम् ।
पातयामास धूम्राक्षो मस्तके तु हनूमतः ॥ ३३॥

ताडितः स तया तत्र गदया भीमरूपया ।
स कपिर्मारुतबलस्तं प्रहारमचिन्तयन् ।
धूम्राक्षस्य शिरो मध्ये गिरिशृङ्गमपातयत् ॥ ३४॥

स विह्वलितसर्वाङ्गो गिरिशृङ्गेण ताडितः ।
पपात सहसा भूमौ विकीर्ण इव पर्वतः ॥ ३५॥

धूम्राक्षं निहतं दृष्ट्वा हतशेषा निशाचराः ।
त्रस्ताः प्रविविशुर्लङ्कां वध्यमानाः प्लवङ्गमैः ॥ ३६॥

स तु पवनसुतो निहत्य शत्रुं
क्षतजवहाः सरितश्च संविकीर्य ।
रिपुवधजनितश्रमो महात्मा
मुदमगमत्कपिभिश्च पूज्यमानः ॥ ३७॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com